[1]गोष्पदपूरम् [A]गोष्पदप्रम्, सीतापूरं सीताप्रं वा वृष्टो देवः । [2]ऊर्ध्वपूरं पूर्यते।

| | | | |
|---|---|---|---|
| पूरम् २, पूरित्वा २, | पूरम् २, पूरयित्वा २, | पुपूरिषम् २, पुपूरिषित्वा २, | पोपूरम् २ ; पोपूरित्वा २ ; |

[3]पूरुः.

## (1038) "पूरी आप्यायने" ( X-चुरादिः-1804. सक. सेट्. उभ. )

### आस्वदीयः ।

'पूरेराप्यायनेऽर्थे स्यात् पूर्यते, पूरयेदपि ॥' (श्लो. 150) इति **देवः** । ईदित्त्वस्य ण्यन्ते प्रयोजनाभावात् णिज्विकल्पो ज्ञेयः । णिजभावपक्षे औत्सर्गिकः शब्विकरण इति ज्ञेयम् । पूरकः-रिका, पुपूरयिषकः-षिका, [4]पूरकः-रिका, पुपूरिषकः-षिका, पोपूरकः-रिका ; [5]पूरन्-न्ती, पूरिष्यन्-न्ती-ती ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचोरयतिवत् (546) ज्ञेयानि ।

## (1039) "पूर्ण सङ्घाते" (X-चुरादिः-1637. अक. सेट्. उभ.)

'पूल—' इत्यस्य पाठान्तरमिदम् । "—'पूण—' इति **शाकटायनः** । कोशशुद्धिस्तु ईदृशेषु कीदृशीति न विद्मः ।" इति **पुरुषकारे** (156 श्लो.) चिन्तितम् । 'पूण—' इति **मा. धा. वृत्तौ** पाठभेदः प्रदर्शितः ।

---

1. 'वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्' (3-4-32) इत्यनेन कर्मण्युपपदे, वर्षस्येयत्तायां गम्यमानायाम्, पूरयतेर्णमुल्, ऊकारलोपश्चास्य विकल्पेन भवति । एवम्, '**मूषिकाबिलपूरम्**, **मूषिकाबिलप्रं** वा वृष्टो देवः ।' इत्यत्रापि णमुल् ज्ञेयः ।
   '**कूपप्रं वापिकापूरं** वर्षति स्माद्य वारिदः ।
   यावता पूर्यते कूपस्तावदित्यवगम्यते ॥' इति **प्र. सर्वस्वे** ।
2. '**ऊर्ध्वे शुषिपूरोः**' (3-4-44) इति कर्तृवाचिन्यूर्ध्वे उपपदे णमुल् । 'कषादिषु यथाविध्यनुप्रयोगः' (3-4-46) इति णमुल्प्रयोजकस्यैव धातोरनुप्रयोगः । 'ऊर्ध्वः सन् पूर्यते कुम्भ **ऊर्ध्वपूरं प्रपूर्यते** ।' इति **प्र. सर्वस्वे** ।
3. बाहुलकादौणादिके उप्रत्यये रूपमेवम् ।
4. णिजभावपक्षे क्रमेण शुद्धात्, शुद्धप्रकृतिकसन्नन्तात्, यङन्ताच्च रूपाणि प्रदर्शितानीति ज्ञेयम् ।
5. णिजभावपक्षे, शतरि 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदं भवति ।

A. 'ददाल भूर्नभो रक्तं **गोष्पदप्रं** ववर्ष च ।' भ. का. 14.20.